# पञ्च श्रद्धा समर्पण मन्त्र

(गुरु-ऋषि-पृथ्वि-पितृ-परमात्मा)

**गुरु मन्त्र**

ॐ गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः । गुरुः साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः ।।

**गायत्री न्यास/विनियोग**

ॐ प्रणवस्य परब्रह्म ऋषिः परमात्मा देवता देवी गायत्री छन्दः प्राणायामे विनियोगः ।

**गायत्री प्राणायाम**

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् । ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धियो योनः प्रचोदयात् ।

ॐ आपो ज्योतिरसोमृतं ब्रह्मभूर्भुवः स्वरोम् ।

(१) ॐ भूः – देब्रेबाट तान्ने र छोड्ने । (२) ॐ भुवः – दाहिनेबाट तान्ने र छोड्ने । (३) ॐ स्वः – देब्रेबाट तान्ने र छोड्ने ।

(४) ॐ महः – दाहिनेबाट तान्ने र छोड्ने । (५) ॐ जनः – देब्रेबाट तान्ने र छोड्ने । (६) ॐ तपः - दाहिनेबाट तान्ने र छोड्ने ।

(७) ॐ सत्यम् - देब्रेबाट तान्ने र छोड्ने । (८) ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धियो योनः प्रचोदयात् ।

ॐ आपो ज्योतिरसोमृतं ब्रह्मभूर्भुवः स्वरोम् - देब्रेबाट नै तान्ने र छोड्ने ।

**करन्यास**

ॐ भूः - अङ्गुष्ठाभ्यां नमः । ॐ भुवः - तर्जनीभ्यां नमः । ॐ स्वः - मध्यमाभ्यां नमः । ॐ तत्सवितुर्वरेण्यम् - अनामिकाभ्यां नमः । ॐ भर्गो देवस्य धीमहि - कनिष्ठिकाभ्यां नमः । ॐ धियो योनः प्रचोदयात् - करतलकरपृष्ठाभ्यां नमः ।

**अङ्गन्यास/हृदयादि न्यास**

ॐ भूः - हृदयाय नमः । ॐ भुवः - शिरसे स्वाहा । ॐ स्वः - शिखायै वषट् । ॐ तत्सवितुर्वरेण्यम् - कवचाय हुम् ।

ॐ भर्गो देवस्य धीमहि – नेत्रत्रयाय वौषट् । ॐ धियो योनः प्रचोदयात् - अस्त्राय फट् ।

**चतुर्विंशतिः मुद्राः (जपादौ)**

<u>अतः परं प्रवक्ष्यामि वर्णमुद्राः क्रमेण तु ।</u> सुमुखं सम्पुटं चैव विततं विस्तृतं तथा ।।

द्विमुखं त्रिमुखं चैव चतुष्पञ्चमुखं तथा । षण्मुखाधोमुखं चैव व्यापकाञ्जलिकं तथा ।।

शकटं यमपाशं च ग्रथितं चोन्मुखोन्मुखम् । प्रलम्बं मुष्टिकं चैव मत्स्यः कूर्मो वराहकम् । ।

सिंहाक्रान्तं महाक्रान्तं मुद्गरं पल्लवं तथा । एता मुद्राश्चतुर्विंशज्जपादौ परिकीर्तिताः ।।

**अष्ट मुद्राः (जपान्ते)**

सुरभिर्ज्ञानवैराग्ये योनिः शङ्खोऽथ पङ्कजम् । लिङ्गं निर्वाणमुद्राश्च जपान्तेऽष्टौ प्रदर्शयेत् ।।

**भूमि प्रार्थना**

समुद्रवसने देवी पर्वतस्तनमण्डिते । विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ।।

**सप्तर्षि प्रार्थना**

कश्यपोत्रिर्भरद्वाजो विश्वामित्रोथ गौतमः। जमदग्निर्वसिष्ठश्च सप्तैते ऋषयः स्मृताः ।।

दहन्तु पापसर्वाणि गृह्णन्त्वर्घ्यं नमो नमः ।।

**हठयोग प्रार्थना**

हकारः कीर्तितः सूर्यष्ठकारश्चन्द्र उच्यते । सूर्यचन्द्रमसो योगात् हठयोगो निगद्यते ।।

.......................................................................................................................................................................

**जपादौ मुद्राः**

| | | | | | |
|---|---|---|---|---|---|
| १) सुमुखम् | २) सम्पुटम् | ३) विततम् | ४) विस्तृतम् | ५) द्विमुखम् | ६) त्रिमुखम् |
| ७) चतुर्मुखम् | ८) पञ्चमुखम् | ९) षण्मुखम् | १०) अधोमुखम् | ११) व्यापकाञ्जलिकम् | १२) शकटम् |
| १३) यमपाशम् | १४) ग्रथितम् | १५) उन्मुखोन्मुखम् | १६) प्रलम्बम् | १७) मुष्टिकम् | १८) मत्स्यः |
| १९) कूर्मः | २०) वराहकम् | २१) सिंहाक्रान्तम् | २२) महाक्रान्तम् | २३) मुद्गरम् | २४) पल्लवम् |

**जपान्ते मुद्राः**

| | | | |
|---|---|---|---|
| १) सुरभिः | २) ज्ञानम् | ३) वैराग्यम् | ४) योनिः |
| ५) शङ्खः | ६) पङ्कजम् | ७) लिङ्गम् | ८) निर्वाणम् |